## वोपसर्जनस्य । (८२/८४९)

उपसर्जनसर्वावयवः समासः उपसर्जनम् । यस्य सर्वेऽवयवा उपसर्जनीभूताः स सर्वोपसर्जनो बहुव्रीहिर्गृह्यते । तदवयवस्य सहशब्दस्य वा स इत्ययमादेशो भवति । सपुत्रः, सहपुत्रः । [1]सच्छात्रः, सहच्छात्रः । उपसर्जनस्य इति किम् ? सहयुध्वा । सहकृत्वा[2] । सहकृत्वप्रियः, प्रियसहकृत्वा इति इह बहुव्रीहौ यदुत्तरपदं तत्परः सहशब्दो न भवति इति सभावो न भवति[3] ॥

## प्रकृत्याशिष्यगोवत्सहलेषु । (८३/८५०)

प्रकृत्या सहशब्दो भवति आशिषि विषये अगोवत्सहलेषु । स्वस्ति देवत्ताय सहपुत्राय सहच्छात्राय सहामात्याय । अगोवत्सहलेषु इति किम् ? स्वस्ति भवते सहगवे, सगवे । सहवत्साय, सवत्साय । सहहलाय, सहलाय । 'वोपसर्जनस्य' (६.३.८२/८४९) इति पक्षे भवत्येव सभावः ॥

## समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु । (८४/१०१२)

स इति वर्तते । समानस्य स इत्ययमादेशो भवति छन्दसि विषये मूर्धन् प्रभृति उदकम् इत्येतानि उत्तरपदानि वर्जयित्वा । 'अनुभ्राता सगर्भ्यः' (वा.सं. ४.२०) । 'अनुसखा सयूथ्यः' (वा. सं. ४.२०) । 'यो नः सनुत्यः' (ऋ. २.३०.९) । समानो गर्भः सगर्भः, तत्र भवः सगर्भ्यः । 'सगर्भसयूथसनुताद् यत्' (४.४.११४/३४६०) इति यत्प्रत्ययः । अमूर्धप्रभृत्युदर्केषु इति किम् ? समानमूर्धा । समानप्रभृतयः । समानोदर्काः । समानस्य इति योगविभाग इष्टप्रसिद्ध्यर्थः क्रियते । तेन सपक्षः, साधर्म्यम्, सजातीयः इत्येवमादयः सिद्धाः भवन्ति ॥

## ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु । (८५/१०१३)

[4]ज्योतिस् जनपद रात्रि नाभि नामन् गोत्र रूप स्थान वर्ण वयस् वचन बन्धु इत्येतेषु उत्तरपदेषु समानस्य स इत्ययमादेशो भवति । सज्योतिः । सजनपदः । सरात्रिः । सनाभिः । सनामा । सगोत्रः । सरूपः । सस्थानः सवर्णः । सवयाः । सवचनः । सबन्धुः ॥

## चरणे ब्रह्मचारिणि । (८६/१०१४)

चरणे [5]गम्यमाने ब्रह्मचारिणि उत्तरपदे समानस्य स इत्ययमादेशो भवति । समानो ब्रह्मचारी सब्रह्मचारी । ब्रह्म वेदः, तदध्ययनार्थं यद् व्रतं तदपि ब्रह्म, तच्चरति इति ब्रह्मचारी । समानः तस्यैव ब्रह्मणः समानत्वाद् [6]इत्ययमर्थो भवति । समाने ब्रह्मणि व्रतचारी सब्रह्मचारी इति ॥

## तीर्थे ये । (८७/१०१५)

तीर्थशब्द उत्तरपदे [7]यत्प्रत्यये परतः समानस्य स इत्ययमादेशो भवति । सतीर्थ्यः । 'समानतीर्थे वासी' (४.४.१०७/१६२८) इति यत्प्रत्ययः ॥

---

1. उदाहरणमिदं नास्ति फ. 2. इति इत्यधिकम् फ. 3. इति इत्यधिकम् क. 4. समानस्य स इति वर्तते इत्यधिकम् फ. ह. 5. गम्यमाने नास्ति फ. 6. इत्ययमस्यार्थो क. ह. 7. यत्प्रत्ययपरे फ. ब. ड.